# श्री भालचंद्र–गणेशस्तोत्रम्

## (द्वितीयं)

## (अपराधक्षमापनरुपं चंद्रेण स्तुतम्)

श्रीगणेशाय नमः श्रीभालचन्द्राय चन्द्रानुग्रहदायिने नमः ।। चन्द्रौ गणपतिं दृष्ट्वा न नाम दंडवत् क्षितौ । पूजयामास तं देवं तुष्टाव स कृतांजलिंः ।।१।। चन्द्र उवाच ।। नमस्ते विघ्नपालाय गणेशाय परात्मने । ब्रह्मेशाय स्वभक्तेभ्यो ब्रह्मभूयप्रदाय ते ।।२।। अनामयाय सर्वादिपूज्याय तु नमो नमः । शिवात्मजाय देवाय विष्णुपुत्राय ते नमः ।।३।। ब्रह्मपुत्राय सूर्यस्य पुत्रते विघ्नहारिणे । शक्तिपुत्राय शेषस्य पुत्राय च नमो नमः ।।४।। सर्व पुत्राय सर्वेषां मात्रे पित्रे नमोनमः । सर्वेशाय परेशाय परात्परतराय ते ।।५।। सिद्धि बुद्धिपते तुभ्यं सिद्धिबुद्धिप्रचालक । हेरंबाय महेशानां महेशाय नमोनमः ।।६।। स्त्रष्ट्रेपात्रेच संहस्त्रै परमात्मस्वरुपिणे । सर्वेभ्यो वरदात्रे तेऽनादिसिद्धाय भो नमः ।।७।। क्षमापराधं देवेश त्वन्माया मोहधारिणः । शरणं ते प्रपन्नस्यं रक्ष मां महतोभयात् ।।८।। मां दृष्ट्वां हर्षसंपन्न अभवन् देवतादयः । अधुना मां निरीक्ष्यैव दोषमुक्ता भयातुराः ।।९।। अतो मां नैव पश्यंति पापिनांपापरुपिणं । निर्दोषं कुरु विघ्नेश करुणालय ते नमः ।।१०।। सर्वदा दर्शनंते वै ममास्तां विघ्ननिवारण । तेनाहं कृतकृत्यश्च भवेयं योनिसंमतः ।।११।। ततोऽति भक्तिसंयुक्तं नृत्यंतं देवसन्निधौ । रोमांचाश्रुसमायुक्तं दृष्ट्वां ढुंढिर्जगादतं ।।१२।। श्रीमद्गणेश उवाच । त्वया कृतमिदं स्तोत्रं मम प्रीतिविवर्धनं । अपराधाननंतांश्च सहे तेऽनेन निश्चितं ।।१३।। सर्वासिद्धिप्रदं पूर्णं भविष्यति विशेषतः । पठतां शृष्वतां चैव नानासुखकरं भवेत् ।।१४।। इति श्रीमन्मौद्गलं पुराणौक्तं चन्द्रानुग्रहदायीभालचन्द्रगणेशस्तोत्रं संपूर्णम् । श्रीसिद्धाश्रमस्थ – भालचन्द्रगणेशार्पणमस्तु ।।